ग्रं.क्र.८०.

स्तोत्र

त्र्यंबकशास्त्री
भटवाईकर

श्रीहरिराय विरचित
श्रीरामार्चन सरणि
संवत १८७९

६९८ / स्तो. ७७९

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

विधाय भगवन्मंदिरे घंटाघोषपुरःसरं श्रीरामं प्रबोध्य स्तुत्वा दंडवन्न
(1) मस्कृत्य तुलसीवर्ज्जं निर्माल्यमपकृष्य मंगलारात्रिकं कृत्वा मंदिरमु
पलिप्य स्नानार्थं नद्यादौ गच्छेत्॥ तन्न सागरस्वननिर्घोषदंडहस्ता
सुरांतक॥ जगत्स्रष्टर्जगन्मर्दिन् नमामि त्वां सुरेश्वरेति संप्रार्थ्य॥ पू
र्वं स्वशाखोक्तविधिना स्नात्वा पुनः स्वदेशकालाद्युच्चार्य श्रीरामस
पर्यांगत्वेन तदाज्ञया तांत्रिकविधिना मंत्रस्नानमहं करिष्ये इति
संकल्प्य॥ स्वस्थितस्य भगवतः श्रीपुरुषोत्तमस्य पादोदकजां धा
रां स्वमूर्ध्नि निपतंतीं विभाव्य मूलेन त्रिरघमर्षणं कृत्वा स्नात्वा प्रा
णायामपुरःसरं मूलषडंगानि विन्यस्य क्रोमित्यंकुशमुद्रया सूर्य
मंडलात्तीर्थान्यावाहयेद्यथा॥ ॐ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि

(2)

तेरवे॥तेनसत्येनमेदेवतीर्थंदेहिदिवाकर॥१॥गंगेचयमुनेचैवगो
दावरिसरस्वति।नर्मदेसिंधुकावेरिजलेस्मिन्संनिधिंकुरु॥२॥
आवाहयामितांदेवींस्नानार्थमिहसुंदरि।एहिगंगेनमस्तुभ्यंसर्व
तीर्थसमन्विते॥३॥इतिमंत्रत्रयेणगंगातिरिक्ततीर्थेषुतीर्थान्या
वाह्यतज्जलेवमितिसंयोज्यकवचेनावगुंठ्यअस्त्रेणसंयोज्यरक्ष्य
धेनुमुद्रयामृतीकृत्यतज्जलेश्रीरामंध्यायन्मूलेनद्वादशधात्रि
धावास्वशिरःप्रोक्ष्यशक्तौप्रणवादिनमोंतैःकेशवादिद्वादशना
मभिर्द्वादशधास्नायात्।अशक्तौमूलमुच्चरंत्रिधानिमज्जेत्।ती
र्थाभावात्स्वसदनेस्नायादुष्णेनवारिणाअल्पाएवतत्रवक्तव्यास्त
त्रमंत्रायथोचिताः।गृहेचेत्पूर्वोक्तमंत्रत्रयेणतीर्थान्यावाह्यमूले २

नद्यादत्त्वाधात्रिमंत्र्यश्रीरामंध्यायन्मूर्द्ध्निनिक्षिपेत्.।तत्रविप्रपादो
(2A) दकंपीत्वाचाल्लयाम्मत्रिशल्लोदकंशंखेनत्रिःपरिभ्राम्यनिजमस्त
केप्रक्षिप्यदेवर्षिपितृतर्पणंविधायवस्त्रंसंपीड्यउरूप्रक्षाल्यपवा
ससीपरिधायदध्यात्इतिसंक्षिप्तस्नानविधिः॥ततःपीठउपविश्य
केशवाद्यैःस्त्रिभिःपीत्वाक्षाम्यांप्रक्षालयेत्करौ।द्वाभ्यामोष्ठौचसंमृ
ज्यद्वाभ्यामुन्मार्जयेत्तथा।एकेनहस्तौप्रक्ष्याल्यपादावपितथैकतः
संप्रोक्ष्यैकेनमूर्द्धानंततःसंकर्षणादिभिः।आस्यनासाक्षिकर्णांश्च
नाभ्युरःकंभुजौस्पृशेत्एवमाचमनंकृत्वान्यासौन्नारायणोनवे दा२
त्ताकेशवा१नारायण२माधव३गोविंद४विष्णु५मधुसूदन६त्रि
विक्रम७वामन८श्रीधर९हृषीकेश१०पद्मनाभ११दामोदर१२।

(3)

॥संकर्षण१ वासुदेव२ प्रद्युम्न३ अनिरुद्ध४ पुरुषोत्तम५ अधोक्षज
६ नृसिंह७ अच्युत८ जनार्दन९ उपेंद्र१० हरे११ कृष्ण१२ एतैः प्रणवा
द्यैश्चतुर्थीनमोंतैः संबोधनांतैर्वाचमनं कार्यं। तत्र मुद्राः आस्ये
नमोः प्रदेशिन्याऽनामया नेत्रकर्णयोः कनिष्ठयानाभिदेशें अंगु
ष्ठः सर्वत्र संमतः। तलेन हृदये न्यसेत् सर्वाभिर्मस्तकेंसयोरित्या
चम्य तिलकानि रचयेत् यथा॰ केशवाद्यभिधानैस्तत्स्थानेषु द्वाद
शस्वपि ललाटोदरहृत्कंठदक्षपार्श्वांसकंठे ततः वामपार्श्वांसकंठे च
पृष्ठदेशे ककुद्यपि। अथ मुद्राः दक्षिणे तु भुजे विप्रो विभृयाद्वै सु ३
दर्शनं। मत्स्यं पद्मं चापरेथ शंखं कूर्मं गदां तथा। ललाटे तु गदां कु
र्याद्धृदये नंदकं पुनः। शंखं चक्रं भुजद्वंद्वे शार्ङ्गं बाणं च मूर्द्धनि॥

एवंकुंकुमाक्तेनचंदनेनतिलकानिविधायतेषुगोपीचंदनमृत्स
यामुद्राविरचयेत्. इतिसंप्रदायः इहानुक्तस्थलेसर्वत्रचक्रांकनं
(3A) ।ततःस्वशाखोक्तांसंध्यांविधायमंत्रसंध्यांकुर्यात्सायथा।मू
लेनत्रिराचम्यप्राणानायम्यमूलषडंगानिविन्यस्यकस्मिंश्चि
त्ताम्रपात्रेजलमादायतज्जलमस्त्रेणसंशोध्यकवचेनावगुं
ठ्यचक्रमुद्रयासंरक्ष्यावाहन्यादिमुद्राःप्रदर्श्यस्नानोक्तमंत्र
त्रयेणसूर्यमंडलादंकुशमुद्रयातीर्थान्यावाह्यतज्जलेयोज
येदितिजलशुद्धिःतज्जलेनदर्भैर्मूलेनतत्वमुद्रयावासप्त
धामूलमंत्रेणमार्जनंविधायतज्जलंवामहस्तेनिधायदक्षेन
संपुटीकृत्यमालामंत्रेणसकृदभिमंत्र्यत्र्यंगुल्यंतराद्गलितो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

दकबिंदुभिःमार्त्वामंत्रेणमूलेनवासप्तधास्वशिरःप्रोक्ष्य·अव
शिष्टंजलंदक्षनाक्षुरेणपीत्वापुनर्दक्षहस्तेजलमादायनासां
(५) तमुपनीयइडयांतःसमाकृष्यदेहांतस्थितंसकलकलुषंप्र
क्षाल्यकृष्णवर्णंतज्जलंपिंगलयाबहिर्विरेच्यपुरःकल्पितवं ज्यालद्
ज्रशिलायामस्त्रायफडितिक्षिपेत्·इत्यघमर्षणं॥पुनरंजलि
नाजलंगृहीत्वामूलमुच्चार्यरविमंडलस्थायश्रीरामायअदो
र्घ्यंकल्पयामिनमइतिमंत्रेणत्रिरर्घ्यंदत्वाततोरामोहमस्मी
तिपरितोजलंभ्रामयित्वामूलगायत्र्यापुनस्त्रिरर्घ्यंदत्वागाय ४
त्रीमष्टोत्तरंमष्टाविंशतिवारंवाप्रजप्यसंहारमुद्रयातीर्थंविसृ
ज्यभास्करमिंद्रादिलोकपालांश्चनत्वाश्रीरामंस्तुवीतेतिमंत्रसंध्या·

शातर

(3A)

क्लीं श्रीं ह्लीं ॐ नमो भगवते रघुनंदनाय रक्षोघ्न विशदाय म
धुरप्रसन्नवदनाय अमिततेजसे बलाय रामाय विष्णवे नमः
इति मालामंत्रः ॥ ॐ जानकीवल्लभाय स्वाहा · दशाक्षरोयं
मनुः । ॐ दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो
रामः प्रचोदयात् · ॥ इति मूलगायत्री · । अथ तर्पणं · तत्र पूर्ववि
त्तीर्थान्यावाह्य · तज्जले संयोज्य मूलमुच्चार्य सांगं सायुधं स
वाहनं सपरिवारं सशक्तिकं श्रीरामं तर्पयामि नमः इत्यष्टा
विंशतिधा सुवर्णचषकीकृतेन करेण दुग्धबुध्या स्वच्छज
लैस्तर्पयेत् · तत एकैकांजलिना तत्तन्नाममंत्रैस्तत्तत्परि
वारदेवतास्तर्पयेद्यथा · । रामं · सीतां · रामं · लक्ष्मणं · रामं · भर

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

रामं १

तं·रामं हनूमंतं·रामं·सर्वाः परिवारदेवतास्तर्पयामि नमः। सर्वाः
पीठदेवतास्तर्पयामि नमः। पुनरंते श्रीरामं संतर्प्य त्रणेभ्यस्तुवीत
(5) । नमोस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै। नमो
स्तु रुद्रेंद्रयमानिलेभ्यो नमोस्तु सोमाग्निमरुद्गणेभ्यः। दक्षि
णे लक्ष्मणे·। आपदामपहर्तारमित्यादि जप्त्वा क्षमापयेत् सीध्या पोप
। त्रिकालमेवं कुर्वीत संध्यालोपं न कारयेत्·। इति तर्पणं।। अ ति ता पांकु
थाजपाजपनिवेदनं। षट् शतानि दिवा रात्रौ सहस्राण्येक गाप-स्रष्ट
विंशतिः हंसः सोहमिमं मंत्रं जीवो जपति सर्वदा। अजपाना रातजपेत
म सा देवी तामहं विनिवेदये। षड्भिः शतैर्गणपतिः षट् ५ ६
सहस्रैः प्रजापतिः पुनः षड्भिः सहस्रैस्तु विष्णुः शंभुः पुनस्त

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(5A)

था त्रिसहस्रैस्तथा जीवः परमात्मा गुरुः क्रमात् । एतद्रूपी
राघवस्तु प्रीयतां मम इतीरयेत् ॥ अथवा दक्षहस्ते जलमादाय
अद्य पूर्वेद्युरहोरात्राचरितेन श्वासोच्छ्वासात्मकेन षट्शता
धिकेन एकविंशतिसहस्रसंख्याकेन अजपागायत्रीमंत्र
जपेन श्रीरामः प्रीयतामिति विसृजेत् ॥ ॐ अस्या अजपामंत्रस्य
हंस ऋषिः अव्यक्ता गायत्री छंदः परमहंसो देवता हं बीजं सः
शक्तिः सोहं कीलकं मोक्षार्थे जपे विनियोगः ॥ इति संकल्प्य ।
चतुर्थीनमोंतैर्नेतान् शिरोवदनहृत्कुक्षिपादसर्वांगेषु क्र
मेण विन्यस्य । सूर्यात्मने अंगुष्ठाभ्यां नमः ॥ सोमात्मने तर्जे० ॥ नि
रंजनात्मने मध्य० । निराभासात्मने अना० । अतनुसूक्ष्मतनुः प्र

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6)

चोदयात्कनिष्टिका·।एतानेवहृदयादिष्वपिविन्यस्यभगव
तोविराट्स्वरूपंध्यात्वा अथसूर्योदयमारभ्ययावत्सूर्योदयंष
ट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपमहंक
रिष्यइतिसंकल्पयेत्·इत्यजपाजपमहं विधिः॥ततोरामंगुरू
न्ज्येष्ठान्नत्वागृहंप्रविश्योदितेनुदितेवाहोमंरवौहोमंविधा
यश्रीरामस्यपंचोपचारिकीं पूजां कृत्वायथाशक्तिदानंदद्यात्
९४ इत्यर्धयामविनिक्तस्याह्नः प्रथमभागकृत्यंद्वितीयभागेवेदशास्त्रा
ध्ययनंतृतीयेधर्मशास्त्राविरुद्धेनकर्मणाधनार्जनंचतुर्थेपुन ६
स्तीर्थंगत्वास्वशाखोक्तरीत्यावैदिकस्नानसंध्यातर्पणंतेलां
त्रिकस्नानसंध्यातर्पणानिविधायगृहमागत्यपादौप्रक्षाल्या

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

रेव. चम्य बहिर्रवेरर्घं दद्यात्.। इति चतुर्थभागकृत्य अथ पंचमे भागे
भगवदनुज्ञां गृहीत्वा श्रीरामपूजामारभेत्. यो देवपूजकस्तापि
पूजाद्रव्याणि यत्फलं. प्राणप्रत्युष्यादिकं सर्वं तस्मै रामात्मने न
(6A) मः इति श्रीरामं नत्वा. ॐ द्वां द्वारदेवताभ्यो नमः ॐ विं विघ्नाधिपे
भ्यो नमः ॐ द्वां भगवद्द्वारपालेभ्यो नमः इति गंधाक्षतैः संपूज्य
४५ स्ववामांगं संकोचयन् निर्गतां विघ्नसंघानां मार्गं दत्वा दक्षपादपु
रःसरं मंदिरांतः प्रविश्य. मंदिरदेवताभ्यो नमः कुलदेवताभ्यो
नमः इति नमस्कृत्य. अनिषिद्धासने त्रीन् कुशान् अधस्तान्निक्षि
प्य तदासनं हस्तेनावष्टभ्य. पृथ्वीत्वयेति मंत्रस्य मेरुपृष्ठ ऋषिः सु
तलं छंदः कूर्मो देवता. आसनोपवेशने विनियोगः पृथ्वि त्वया ध

तालोकादेवित्वंविष्णुनाधृता।त्वंचधारयमांनित्यंपवित्रंकुरुचास रु
(२) नमित्यासनमंत्र्य·उपविश्यतुलसीकमलाक्षमालाःकंठेधृत्वा
अधोमंडूककालाग्निरुद्रानंतवाराहकूर्मकोअनंतंपृथिवींदेवी
नमाम्याधारशक्तिकां॥इतिनमस्कृत्य·।ॐक्ष्रौंदुष्टविद्रावणायश्रीनृ
सिंहायनमः।अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं·सर्वेषाम
विरोधेनब्रह्मकर्मसमारभे·॥अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः
येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया॥इतिपार्ष्णिघातत्रयंऊर्ध्वो
र्ध्वतालत्रयंचकृत्वावामेगुरुभ्योनमः।दक्षेगंगणपतयेनमः। ७
मध्येश्रीरामचंद्रायनमः॥इतिनत्वाअस्त्रेणछोटिकायादिशोब
ध्वास्वपरितोग्निप्राकारंविचिंत्य·सुदर्शनचक्रांतर्वर्तिवह्नि

(7A)

मंडले वर्त्तमानोहमित्यात्मानं विभाव्य भूतशुद्धिं कुर्यात्॥ सा यथा॥ हूं
कारेण मूलाधारात्कुंडलिनीमुत्थाप्य हंसः इति मंत्रेण सहस्रदल
कमलकर्णिकांतर्वर्त्तिनि परमात्मनि विलापयेत्॥ ततः पादादिजा
नुपर्यंतस्थितां पृथ्वीं जान्वादिनाभिपर्यंतस्थितास्वप्सु प्रविलाप्य ताः
नाभ्यादिहृदयपर्यंतस्थिते वह्नौ तं वह्निं हृदयाद्भ्रूमध्यांतःस्थे वायौ तं
च भ्रूमध्यादिब्रह्मरंध्रांतस्थ आकाशे तं चाहंकारे तं च महत्तत्त्वे तच्च
प्रकृतौ तां च ब्रह्मणि प्रविलापयेत्॥ ततः पुरुषनिभं पापमनादिज
वसंभवं ब्रह्महत्यादिमहापातकांगमुपपातकरोमाणं रक्तश्मश्रुवि
लोचनं खड्गचर्मधरं कृष्णवर्णमधोमुखमंगुष्ठप्रमाणं वामकुक्षौ वि
चिंत्य प्राणायामं कुर्यात् तद्यथा॥ यँ इति वायुबीजं षोडशवारं जपन्वा

जीवेन संहर

(8) मनासयावायुमापूर्यसपापं देहं विशोष्य रं इति चतुःषष्टिवारमावृत्तेन व
ह्नैनोत्सृज्या क्लिबीजेन कुंभकत्रयोगेन सपापं देहं दग्ध्वा पुनर्यं इति वायुबी
जेन द्वात्रिंशद्वारमावृत्तेन दग्धपापपुरुषं भस्म रेचयेत् । ततो वमि
तिबीजजपाद्वत्सात् चंद्रान्मानुषा वर्णमयीममृतवृष्टिं निपात्य भ
स्माप्लाव्य लं इति भूबीजजपात् दृढीकृत्य अवयवान्निष्पाद्य परमात्मनः प्र
कृतिं तस्या महत्तत्वं ततो हंकारं तस्मादाकाशं ततो वायुं तस्मात्तेजः त
स्माज्जलं तस्मात्पृथिवीं निर्मथ्य स्वस्वस्थाने स्थापयित्वा ब्रह्मरंध्रस्थ
परमात्मनः सकाशात् सोहं इति मंत्रेण जीवात्मानं प्रदीपकलिकाकारं कुंड ८
लिनीद्वारा हृदयकमलमानीय कुंडलिनीं मूलाधारे स्थापयित्वा स्वश
रीरं निरस्तसमस्तकिल्बिषं वा भगवदाराधनयोग्यं विभावयेत् । तथा च

Joint property of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

श्रुतिः तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुः वायो
रग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नं अ
न्नाद्रेतो रेतसः पुरुषः स वा अयं पुरुषोऽन्नमयो रसमय इति भूत
शुद्धिः ॥ अथ भूतानि संशोध्य प्राणान् प्रतिष्ठापयेत् यथा । अस्य प्रा
णप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छंदां
सि । चैतन्यरूपिणी प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों की
लकं मम प्राणप्रतिष्ठापने विनियोगः । ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो
नमः शिरसि । ऋग्यजुःसामभ्यश्छंदोभ्यो नमः मुखे । चैतन्यरूपिण्यै
प्राणशक्त्यै देवतायै नमः हृदये आं बीजाय नमः गुह्ये ह्रीं शक्तये नमः
पादयोः क्रों कीलकाय नमः नाभौ इति ऋष्यादिन्यासः ॐ अं कं ४ पृथि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

व्यस्तेजोवाय्वाकाशात्मने अं अंगुष्ठाभ्यां नमः। ॐ इं चं ४ शब्दस्पर्शरूपर
सगंधात्मने इं तर्जनीभ्यां नमः। ॐ उं टं ४ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणा
(९) त्मने उं मध्यमाभ्यां नमः। ॐ एं तं ४ वाक्पाणिपादपायूपस्थात्मने एं
अनामिकाभ्यां नमः। ॐ ओं पं ४ वक्तव्यादानगमनविसर्गानंदात्मने ओं
कनिष्ठिकाभ्यां नमः। ॐ अं यं ४ मनोबुद्ध्यहंकारचित्तात्मने अः करतल
करपृष्ठाभ्यां नमः। इत्यंगुष्ठादि। ॐ अं कं ४ पृथिव्यप्तेजोवाय्वाका
शात्मने अं हृदयाय नमः। ॐ इं चं ४ शब्दस्पर्शरूपरसगंधात्मने इं शिरसे
स्वाहा। ॐ उं टं ४ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने उं शिखायै वषट्॥ ९
ॐ एं तं ४ वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं। ॐ ओं पं ४ वक्तव्या
दानगमनविसर्गानंदात्मने औं नेत्रत्रयाय वौषट्। ॐ अं यं ४ मनोबु

(9A)

ध्यहंकारचित्तात्मनेत्र्यः अस्त्रायफट्। इतिहृदयादि। ॐ आं नमः ना
भ्यादिपादांतं। ॐ ह्रीं नमः हृदयादिनाभ्यंतं। ॐ क्रों नमः मस्तकादिहृ
दंतं विन्यस्य ध्यायेत्। रक्ताब्धिपोतारुणपद्मसंस्थां पाशांकुशावि
ष्वत्रासचापानू शूलं कपालं दधतीं कराब्जै रक्तां त्रिनेत्रां प्रणमा
मि देवीं। इति ध्यात्वा मनसा संपूज्य हृदि हस्तं दत्वा ॐ आं ह्रीं क्रों यं रं
लं वं शं षं सं हं हंसः सोहं मम प्राणा इह प्राणाः ॐ आं ह्रीं क्रों मित्यादि म
म जीव इह स्थितः। ॐ आं ह्रीं क्रों मित्यादि मम सर्वेंद्रियाणि। ॐ आं ह्रीं
क्रों मित्यादि मम वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणप्राणा इहागत्य
सुखं चिरं तिष्ठंतु स्वाहा। इति मंत्रं त्रिः पठेत्। ततः पंचदश संस्का
रसिद्ध्यर्थं पंचदश प्रणवावृत्तीः कुर्यात् इति प्राणप्रतिष्ठा। अथमा

त्रकान्यासः। तत्रप्राणायामः स्वरैः पूरकः कायैः कुंभकोयाद्यैरेचक
(१०) एवंक्रमेणप्राणायामत्रयंकुर्यात्॥ ॐ अस्यमातृकान्यासस्यब्रह्मा
ऋषिः गायत्रीछंदः मातृकासरस्वतीदेवता हलोबीजानिस्वराः
शक्तयः। अव्यक्तंकीलकं। श्रीरघुपतिसपर्यांगत्वेनन्यासेविनि
इतिसंक न्यास योगः। ॐ ब्रह्मणेऋषयेनमः शिरसि। गायत्रीछंदसेनमः मुखे। मा
तृकासरस्वतीदेवतायैनमः हृदये हल्बीजेभ्योनमः गुह्ये। स्वरेभ्यः श
क्तिभ्योनमः पादयोः। अव्यक्तकीलकायनमः सर्वांगे। इति ऋष्यादि
न्यासः। ॐ अं कं ४ आं अंगुष्ठाभ्यांनमः। ॐ इं चं ४ ईं तर्जनीभ्यांनमः ॐ १०
उं टं ४ ऊं मध्य०। ॐ एं तं ४ ऐं अना०। ॐ ओं पं ४ औं कनिष्ठिका०। ॐ अं यं ८
अः करतलकरपृष्ठा०। अयमंगुष्ठादिन्यासोनमोंतोहृदयादिपक्षे

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

वांतो वा कार्य इति संप्रदायः। ॐ अं कं ४ आं हृदयाय नमः। ॐ इं चं ४
ईं शिरसे स्वाहा। ॐ उं टं ४ ऊं शिखायै वषट्। ॐ एं तं ४ ऐं कवचाय
हुं। ॐ ओं पं ४ औं नेत्रत्रयाय वौषट्। ॐ अं यं ९ अः अस्त्राय फट्॥ अ
थ ध्यानं संपूर्णेंदुप्रभाजां सकललिपिमयीं लोलवक्त्रां त्रिनेत्रां
शुक्लालंकारभूषां शशिमुकुटजटाजूटयुक्तां त्रिनेत्रां। पुस्तस्र
क्पूर्णकुंभं वरमपि दधतीं शुक्लपद्मांबराढ्यां वाग्देवीं पद्मव
क्त्रां कुचभरनमितां चिंतयेत्साधकेंद्रः। इति ध्यात्वा मनसा सं
पूज्य न्यसेत्। तत्र प्रथमं मातृकान्यासः स च सर्वेष्वपि वर्णे
षु प्रणवादिनमोंतः कार्यः। तत्रायं क्रमः। कंठे षोडशदले षोड
श स्वरान्सबिंदून् विन्यसेत्। एवं हृत्पद्मे द्वादशदले कादिठांता समनं ५

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com